# PT4/ANNUAL EXAMINATION, 2023-24

## SANSKRIT

**Time – 3 hrs.** **Class – VII** **M.M. – 80**

Name of the student ____________________ Section ____ Date - 08.02.2024 (Thursday)

निर्देशाः -

- सर्वे प्रश्नाः अनिवार्याः सन्ति ।
- प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि ।
- प्रश्नपत्र चतुर्भागेषु विभक्तमस्ति अतः भागानाम् उल्लेखः करणीयः ।

## खण्डः - क [अपठितावबोधनम् 10 अंकाः]

**प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

वीरबालकेषु अभिमन्युः प्रमुखः बालः अस्ति। सः सप्तमहारथिभिः एकाकी एव युद्धम् अकरोत् युद्धे सः वीरगतिम् प्राप्तः। तस्य गाथा अद्यापि स्मरणीया अस्ति। अभिमन्युः अर्जुनस्य पुत्रः आसीत्। तस्य माता सुभद्रा आसीत्। यदा सः सुभद्रायाः गर्भे आसीत्, तदा एव सः चक्रव्यूहे प्रवेशम् अशृणोत्। अयम् बालः बाल्यकालात् एव अतिवीरः साहसी चासीत्। एकदा यदा अर्जुनः सुदूरम् युद्धाय अगच्छत् तदा कौरवाः चक्रव्यूहम् अरचयन् । अर्जुनात् अतिरिक्तः अन्ये पाण्डवाः चक्रव्यूहभेदनम् न अजानन्। चक्रव्यूहस्य वार्ताम् श्रुत्वा अभिमन्युः अवदत् - "अहम् चक्रव्यूहस्य प्रवेशद्वाराणाम् त्रोटनविधिम् जानामि चक्रव्यूहभेदनम् तु मया मातुः गर्भे एव शिक्षितम्। मम पिता एकदा वार्तामध्ये मम मातुः सम्मुखं चक्रव्यूहभेदनम् अकथयत्। तदा एव अहम् सम्पूर्ण-वार्ताम् अशृणोत्। अधुना चिन्ताम् विहाय युद्धानुमतिम् यच्छ।"

**1. एकपदेन उत्तरत -** **1×3=3**

i) वीरबालेषु प्रमुखः कः?

ii) अभिमन्युः कस्य पुत्रः आसीत् ?

iii) सः मातुः गर्भे एव किम् अश्रृणोत्?

**2. एकवाक्येन उत्तरत -** **2×2=4**

i) बाल्यकालात् एव अभिमन्युः कीदृशः बालः आसीत्?

ii) कौरवाः चक्रव्यूहम् कदा अरचयन् ?

**3. गद्यांशस्य समुचितं शीर्षकम् एकं लिखत ।** **1**

**4. यथानिर्देशम् उत्तरत -** **1×2=2**


i) अनुच्छेदात् 'समीपम्' इति पदस्य एकम् विपर्ययम् लिखत ।

ii) 'अरचयन्' इति क्रियापदस्य कर्तृपदम् किम् ?

## खण्ड - ख ( रचनात्मककार्यम् - 25 अंकाः )

**प्र.2 चित्रम् दृष्ट्वा मञ्जूषायाः शब्दानां सहायतया पञ्च वाक्यानि रचयत -** **2×5=10**

| | |
|---|---|
| मञ्जूषा - | भवनानि, चतुष्पथः, बसयानम्, कारयानानि, आपणानि, जनाः, वृक्षः, पादपाः, इतस्ततः, उन्नतानि, तिष्ठन्ति, पुस्तकस्य, आपणम्, एतत् |



**प्र.3 अधोलिखितं वार्तालापं मञ्जूषातः पदं चित्वा पूरयत -** **1×5=5**

| मञ्जूषा - | अहम्, तत्र, तिष्ठत, संस्कृतग्रामः, पठिष्यामः |
|---|---|

छात्राः - गुरवे नमः।

अध्यापकः - नमस्कारः स्वस्थाने (1) .................... ।

छात्राः - अद्य वयं कं पाठम् (2) ......................... ।

अध्यापकः - अद्य (3) .............. संस्कृतग्रामः इति पाठं पाठयामि।

छात्राः - भो अध्यापक ! किम् भवान् (4) ...................... अगच्छत् ?

अध्यापकः - आम् ! कर्णाटके एकः (5) ...................... अस्ति। किं जानासि ग्रामे सर्वे जनाः संस्कृतेन एव वार्तालापं कुर्वन्ति?

**प्र4. स्वविद्यालयस्य वार्षिकोत्सवं वर्णयन् पितरं प्रति पत्रमेकं लिखत -** **1×5=5**

चिन्मयः छात्रावासः

नवदेहली

तिथि :

परमपूज्याय जनकाय नमः !

अत्र सर्वम् कुशलं तत्रास्तु ।

गते (1) ................ अस्माकम् (2) ................. वार्षिकोत्सवः (3) ................ । अस्मिन् उत्सवे (4) ................. प्रमुखातिथिः आसीत्। अस्माकम् विद्यालये अनेके सांस्कृतिकाः (5) .................... अभवन् केचन् छात्राः अगायन् केचन् च अनृत्यन् । प्राचार्यः विद्यालयस्य (6) .................. अपठत् । शिक्षानिदेशकः (7) .......... अकरोत् । अहम् अपि (8) ........... प्राप्तवती यतः अहम् कक्षायाम् प्रथमम् स्थानम् (9) ..............। मातृचरणयोः मम प्रणामाः।

(10) ............पुत्री

ऋचा

| मञ्जूषा - | भवदीया, पुरस्कारम्, विद्यालयस्य, प्रतिवेदनम्, सप्ताहे, लब्धवती, शिक्षानिदेशकः, पुरस्कारवितरणम्, अभवत्, कार्यक्रमाः |
|---|---|

**प्र.5 अधोलिखितवाक्येषु पञ्चवाक्यानाम् संस्कृतभाषायाम् अनुवादं कुरुत -** **1×5=5**

i) माला लिखती है |

ii) हम सब खेलते हैं |

iii) दो मनुष्य जाते हैं |

iv) तालाब में मछलियाँ तैरती हैं |

v) वे सब पुस्तकें पढ़ती हैं |

vi) राम का मित्र आता है |

vii) मैं कलम से लिखता हूँ |

## खण्ड - ग [ अनुप्रयुक्तव्याकरणम् - 15 अंकाः ]

**प्र.6 निर्देशानुसारं शब्दरूपं लिखत -** **1×5=5**

क 'अस्मद्' शब्दस्य तृतीया एकवचने रूपं भवति -

अ) अहम् ब) मया स) आवाभ्याम् द) अस्मभ्यम्

ख 'युष्मद्' शब्दस्य सप्तमी बहुवचने रूपं भवति -

अ) यूयम् ब) त्वयि स) युवयोः द) युष्मासु

ग 'कवि' शब्दस्य द्वितीया बहुवचने रूपं भवति -

अ) कविः ब) कवीन् स) कविभ्याम् द) कवयः

घ 'गुरु' शब्दस्य चतुर्थी एकवचने रूपं भवति -

अ) गुरुम् ब) गुरवे स) गुर्वोः द) गुरुभ्यः

ङ 'अस्मद्' शब्दस्य षष्ठी एकवचने रूपं भवति -

अ) मम ब) मया स) आवयोः द) अस्माकम्

**प्र.7 निर्देशानुसारं धातुरूपं लिखत -** **1×5 =5**

1- 'पा' धातोः लृट् लकारे प्रथमपुरुष-एकवचने रूपं भवति --- [ पिबतु / पास्यति ]

2- 'पत्' धातोः लङ्लकारे प्रथमपुरुष-बहुवचने रूपं भवति --- [ अपताम् / अपतन् ]

3- 'खाद्' धातोः लट्लकारे उत्तमपुरुष-एकवचने रूपं भवति --- [ खादामि / खादामः ]

4- 'पठ्' धातोः लोट्लकारे प्रथमपुरुष-बहुवचने रूपं भवति --- [ पठताम् / पठन्तु ]

5- 'चल्' धातोः विधिलिङ्लकारे मध्यमपुरुष द्विवचने रूपं भवति --- [ चलेव / चलेतम् ]

**प्र.8 कोष्ठकात् उचितं संख्यापदम् चित्वा रिक्तस्थानानि पूरयत -** **1×5 =5**

क. विद्यालये (2)............ छात्रौ गृहकार्यम् कुरुतः। [ द्वौ / द्वे ]

ख. वृक्षे (5) ............ फलानि सन्ति। [ पञ्च / पञ्चदश ]

ग. अत्र (3).................... गजाः भ्रमन्ति। [ त्रयः / त्रीणि ]

घ. एकस्मिन् हस्ते (1) .............. अंगुष्ठः भवति। [ एकः / एका ]

ङ. सप्ताहे (7) ............. दिवसाः भवन्ति। [ सप्ताः / सप्त ]

## खण्डः 'घ' ( पठितावबोधनम् - 30 अंकाः )

**प्र.9 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

विश्वस्य उपलब्धासु भाषासु संस्कृतभाषा प्राचीनतमा भाषास्ति। भाषेयं अनेकाषां भाषाणां जननी मता। प्राचीनयोः ज्ञानविज्ञानयोः निधिः अस्यां सुरक्षितः। संस्कृतस्य महत्वविषये केनापि कथितम्- 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'। इयं भाषा अतीव वैज्ञानिकी। केचन कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा। अस्याः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदासादीनां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्। कौटिल्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमम् आर्यभटः अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम्। संस्कृते यानि अन्यानि शास्त्राणि विद्यन्ते तेषु वास्तुशास्त्रं, रसायनशास्त्रं, खगोलविज्ञानं, ज्योतिषशास्त्रं, विमानशास्त्रम् इत्यादीनि उल्लेखनीयानि।

**I. एकपदेन उत्तरत -** **1×2=2**

क. का भाषा प्राचीनतमा ?

ख. शून्यस्य प्रतिपादनम् कः अकरोत् ?

**II. पूर्णवाक्येन उत्तरत -** **2×1=2**

क. कौटिल्येन रचितं शास्त्रं किम् ?

**III. यथानिर्देशम् उत्तरत -** **1×1=1**

क. 'सर्वोत्तमा भाषा' अनयोः विशेषणपदम् किम् ?

**प्र.10 अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम्॥

**I. एकपदेन उत्तरत -** **1×2=2**

क- के पुरुषं न विभूषयन्ति ?

ख- कानि क्षीयन्ते ?

**II. पूर्णवाक्येन उत्तरत -** **2×1=2**

क- का एका पुरुषं समलङ्करोति

**III. यथानिर्देशम् उत्तरत -** **1×1=1**

क- संधिच्छेदम् चिनुत - 'वाण्येका' ..............................

i. वाण् + एका ii. वाणी + एक iii. वाणी + एका

**प्र.11 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -** **1×5=5**

| मञ्जूषा - | कः , कस्य , का , कान् , कस्य |
|---|---|

1- मालिनी द्वारम् उद्घाटयति ।

2- अस्माकं त्रिवर्णध्वजः विश्वविजयी भवेत् ।

3- गजस्य वधेनैव मम दुःखम् अपसरेत् ।

4- मण्डूकस्य शब्दम् अनुसृत्य महतः गर्तस्य अन्तः पतितः मृतः च ।

5- वरिष्ठान् प्रति अस्माभिः प्रियं व्यवहर्तव्यम् ।

**प्र.12 मञ्जूषातः समानार्थकानि पदानि चित्वा लिखत -** **1×5=5**

| मञ्जूषा - | सम्पन्नम् , त्यक्त्वा , प्रसन्नतया , विस्मयेन , कुटुम्बस्य |
|---|---|

1- आश्चर्येण

2- अपहाय

3- परिवारस्य

4- समृद्धम्

5- उल्लासेन

**प्र.13 मञ्जूषातः विपर्ययपदानि चित्वा लिखत -** **1×5=5**

| मञ्जूषा - | लघुचेतसाम् , दूरस्थम् , मित्रतायाः , विक्रेतुम् , अधुना |
|---|---|

क. क्रेतुम् ख. उदारचरितानाम् ग. शत्रुतायाः

घ. पुरा ङ. समीपस्थम्

**प्र.14 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -** **1×5=5**

| मञ्जूषा - | तानि , गमिष्यति , स्फोटयिष्यति , मन्दिरम् , करिष्यामि |
|---|---|

क. काष्ठकूटः चञ्च्वा गजस्य नयने ........................... ।

ख. ................. पत्राणि सुन्दराणि सन्ति ।

ग. .................... परितः भक्ताः सन्ति ।

घ. मार्गे स्थितः अहमपि शब्दं ....................... ।

ङ. तृषार्तः गजः जलाशयं ........................... ।